International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(3): 403-405
© 2025 IJSR
www.anantaajournal.com
Received: 05-04-2025
Accepted: 08-05-2025

**B Mohan Kumar**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**B Mohan Kumar**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

# भारतीयपरम्परायां काव्यगुणमीमांसा (प्राचाम्)

**B Mohan Kumar**

## प्रस्तावना

साहित्यशास्त्रं भारतीयज्ञानपरम्परायां काव्यस्य तत्त्वानि विवेचयति । अस्य शास्त्रस्य मुख्यंप्रयोजनं काव्यस्य स्वरूपतद्गतभेददोषरसगुणालङ्कारादिनिरूपणं भवति । काव्यस्वरूपनिरूपणप्रसङ्ग एव तद्विभावादिरूपतया नायिकानां नायकानां च भेदा अपि प्राप्तनिरूपणा भवन्ति, तेन तदप्यस्य शास्त्रस्याङ्गभावं भजते । शास्त्रमिदं वेदानां लौकिककाव्यग्रन्थानां च ज्ञानाय अत्यन्तमावश्यकम् । राजशेखरः अस्य शास्त्रस्य उपयोगित्वम् अवेक्ष्यैव इदं शास्त्रं वेदस्य सप्तममङ्गम् इति प्रतिपादनमकरोत् । उपकारकत्वादलङ्कारः सप्तममङ्गमिति यायावरीयः । ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः ।[1] नैतावदेव, राजशेखरेण तु साहित्यशास्त्रं चतसृणामपि विद्यानां सारभूतमिति निगदितम् - पञ्चमी साहित्यविद्येति यायावरीयः, सा हि चतसृणामपि विद्यानां निष्यन्दः [2] । इत्थमिदं शास्त्रं बहुव्यापकम् इति ज्ञायते । परमत्र प्रधानतया काव्यलक्षणप्रयोजनहेतुभेदादयः, शब्दशक्तयः, रसगुणरीत्यादयश्च अस्य शास्त्रस्य प्रमेयरूपेण स्वीकृताः आचार्यैः । अथ च प्रतापरुद्रकारेण विद्यानाथेन शास्त्रस्यास्य प्रमेयाः इत्थं प्रपञ्चिताः ।

## गुणा

यथा काव्यस्य शब्दार्थौ शीरीरं तथैव कव्यस्योत्कर्षहेतवः गुणालङ्काराः भवन्ति । तत्र काव्यस्य ललितसन्निवेशत्वं तु गुणैरेव भवति अत एव काव्यस्य लोकशास्त्रातिरिक्तत्वम् । विलक्षणशब्दार्थमयस्य काव्यस्य चारूत्वम् द्विविधं, स्वरूपमात्रनिष्ठम् तथा संघटनाश्रितञ्चेति । तत्र संघटनाश्रितं चारूत्वं गुणैरेव समुल्लसति । लोकेऽपि दृश्यते सौन्दर्यसौकुमार्यविशिष्टा सकलालङ्कारैर्विभूषिताप्यङ्गना यथा गुणैर्विना निर्गन्धकिंशुक इव न शोभामावहति । तथैव काव्यमपि गुणैर्विना शोभां न धत्ते । अत एव काव्यस्य शोभायाः कर्तारो धर्माः गुणाः इति उच्यते । गुणविषये आलङ्कारिकाणां विचाराः

## भरतमतम्

गुणप्रस्ताव: अलङ्कारशास्त्रे प्रथमतया नाट्यशास्त्रे दृश्यते ।

गुणनिरूपणात् प्राक् भरतमुनिः दोषान् प्रस्तुत्य गुणा विपर्ययादेषां माधुर्योदार्यलक्षणाः [3] इति दोषाभावरूपत्वमेव गुणानां लक्षणमाह । भरतेन ते च गुणा: दशधा प्रोक्ता: -

---
[1] काव्यमीमांसा
[2] काव्यमीमांसा ४-
[3] नाट्यशस्त्रम् ६-३१

**श्लेषः प्रसादः समता समाधिः माधुर्यमोजः पदसौकुमार्यम् ।**
**अर्थस्य च व्यक्तिरूदारता च कान्तिश्च काव्यस्य गुणा दशैते ।।**
4

**भामहमतम्**

भरतादनन्तरं भामहः माधुर्यौज : प्रसादाख्यान् त्रीनेव गुणान् अब्रवीत् । यथा

**केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि ।** 5
**श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते ।**
**अविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत्** ॥ 6

अर्थात् समासभूयस्त्वम् ओजसो लक्षणम् । श्रव्यत्वे सति नातिसमस्तार्थत्वं माधुर्यस्य लक्षणम् । अविद्वदङ्गनाबालप्रतीतार्थपदवत्त्वं प्रसादस्य लक्षणम् ।

**दण्डिमतम्**

भरतोक्ताः दशगुणाः दण्डिना पुनरुज्जीविताः । दण्डिमते गुणाः मार्गव्यवस्थापकाः काव्यशोभाकराः धर्माश्च । दण्डिना तेषां क्रमस्तु एवम् उक्तः

**श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।**
**अर्थव्यक्तिरूदारत्वमोजः कान्तिसमाधयः ।।** 7

**वामनमतम्**

वामनस्तु काव्यशास्त्रीयभाषायां काव्यशोभायाः कर्तारो धर्माः गुणाः 8 इति गुणलक्षणमाह । तदतिशयहेतवस्त्वलङ्काराः 9 इति कथनेन तदीयालङ्कारलक्षणदर्शनेन च अलङ्कारव्यावृत्तं गुणस्वरूपं च प्रतिपादितम् इति वक्तुं शक्यते । एतन्मते अलङ्काराः काव्यशोभासंवर्धकाः गुणास्तु काव्यशोभाधायकाः । पूर्वे नित्याः 10 इति सूत्रेण वामनेन गुणानां नित्यत्वं प्रकटितम् । अर्थात् गुणैर्विना काव्यत्वमेव न सम्भवति अतः नित्यत्वम् । अत एव वामनेन गुणानां शोभाधायकत्वमेव प्रतिपादितं न तु शोभातिशयसम्पादकत्वम् । एतन्मते गुणाः शब्दार्थधर्मतया द्विविधाः ।

**आनन्दवर्धनमतम्**

आनन्दवर्धनः रसादिलक्षणमङ्गिनम् आश्रिताः धर्माः गुणाः इति, वाच्यवाचकलक्षणानि अङ्गानि आश्रिताः धर्मास्तु अलङ्काराः इति च व्याचख्यौ ।

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।**
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ।।**11

तत्र लौकिक शौर्यादिगुणवत् काव्यगुणानाम् अङ्गयुपस्कारकत्वम् अलङ्काराणामपि लौकिक कटककुण्डलाद्यलङ्कारवत् शरीरोपस्कारकत्वमिति गुणालङ्कारयोः अन्यत् स्वरूपं तेन निरूपितम् । यद्यपि ध्वनिकारः अङ्गिपदं वा रसादिपदं वा न प्रयुक्तवान् । तथापि श्रृङ्गार एव मधुरः इत्यादिविशेषलक्षणानुसारेण गुणानां रसधर्मत्वमेव ध्वनिकारमतमिति ज्ञायते । ध्वनिकारेण माधुर्यौजः प्रसादाख्याः त्रय एव गुणाः लक्षिताः ।

**१) माधुर्यम्**

**शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।**
**तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ।।**12

वस्तुतः माधुर्यं शृङ्गारादि रसधर्मः । किन्तु माधुर्यमुपचारवृत्त्या शृङ्गारादि रसव्यञ्जकं काव्यमपि अवलम्बते ।

**२) ओज**

**रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।**
**तद्व्यक्तिहेतू शब्दार्थवाश्रित्यौजो व्यवस्थितम् ।।**13

ओजः रौद्रादिरसेषु प्रधानतया अवतिष्ठते । परम्परया तत्प्रतिपादके काव्येऽपि । दीप्त्या लक्ष्यन्ते इत्युक्तेः ओजसः स्वरूपं दीप्तिरेव इति भावः ।

**३) प्रसादः**

**सर्वरसान् प्रति काव्यस्य समर्पकत्वं प्रसादः ।** 14

प्रसादस्तु शब्दार्थयोः स्वच्छता च सर्वरससाधारणो गुणः सर्वरचनासाधारणश्च इत्यानन्दवर्धनस्य विवरणम् । अत्र समर्पकत्वं नाम व्यापकत्वम् । तच्च काव्यनिष्ठं रसविषयकञ्च ।

मम्मटमतम्

4 नाट्यशस्त्रम् १७-६६
5 काव्यालङ्कारः २-१०
6 काव्यालङ्कारः २-११
7 काव्यादर्शः १-४१
8 काव्यालङ्कारसूत्रम् ३.१
9 काव्यालङ्कारसूत्रम् ३.२
10 काव्यालङ्कारसूत्रम् ३-१-३
11 ध्वन्यालोकः ३-३३
12 ध्वन्यालोकः ३-३४
13 ध्वन्यालोकः ३-३५
14 ध्वन्यालोकः ३-३६

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।।**[15]

अत्र कारिकया मम्मटाचार्येण एवं प्रतिपादितं यत् गुणाः अङ्गिनः रसस्य धर्माः, रसस्य उत्कर्षहेतवः, अचलस्थितयः भवन्तीति। यथा शौर्यादयः गुणा आत्मन एव हि, न आकारस्य तथा माधुर्यादयो गुणाः रसस्यैव न तु वर्णानाम्। अर्थात् रसधर्मत्वे सति रसोत्कर्षहेतुत्वं गुणानां लक्षणम्। वामनमतं खण्डयता, अनन्दवर्धनानुसारिणा आचार्यमम्मटेन तु माधुर्यौजप्रसादेषु त्रिष्वेव दशशब्दगुणानां दशार्थगुणानाञ्च् अन्तर्भावः प्रतिपादितः।

**माधुर्यौजः प्रसादाख्याः त्रयस्ते न पुनर्दश।**[16]

वामनोक्तानां गुणानां केषाञ्चित् त्रिषु माधुर्यौजः प्रसादेषु अन्तर्भावात् केषाञ्चित् दोषाभावरूपत्वात्, केषाञ्चिद् दोषरूपत्वादेव दशशब्दगुणत्वम् अर्थगुणत्वञ्च् खण्डितमस्ति। यथोक्तं कारिकायां

**१) माधुर्यम्**

**केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।**
**अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश।।**[17]
**आह्लादकत्वं माधुर्यं श्रृङ्गारे द्रुतिकारणम्।**
**करूणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।।**[18]

माधुर्यं नाम आह्लादकत्वमिति। अर्थात् आह्लादकत्वं माधुर्यस्य लक्षणम्। श्रृङ्गाररसे माधुर्येण चित्तस्य द्रुतिर्जायते। इदं च माधुर्यं श्रृङ्गारे, तदपेक्षया करूणे, ततोऽपि विप्रलम्भे तदपेक्षया च शान्ते अतिशयान्वितं भवति।

२) ओज

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**
**बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च।।**[19]

दीप्त्या चित्तविस्तारहेतु: ओजो नाम गुणः। स च वीररसस्थिति: क्रमशश्च वीरापेक्षया बीभत्से तदपेक्षयापि रौद्रे अतिशयी इति।

३) प्रसाद

**शुष्केन्धनाग्निवत्स्वच्छजलवत्सहसैव यः।**
**व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः।।**[20]

यः शुष्केन्धनाग्निवत् स्वच्छजलवत् चित्तं क्षिप्रं व्याप्नोति स प्रसादो गुण: । अयं च सर्वेषु रसेषु प्राप्तस्थिति: इति।
एवं विविधमतानां परिशीलनेन स्पष्टं भवति यत् साहित्यशास्त्रं भारतीयपरम्परायां काव्यस्य समग्रस्वरूपविवेचनाय प्रवृत्तम् अतीव सुसमृद्धं शास्त्रम् अस्ति। अस्मिन् शास्त्रे गुणालङ्कारादीनां प्रमेयाणां निरूपणमेव न, अपितु सहृदयानां रसास्वादतत्त्वान्यपि आविष्कृतानि वर्तन्ते। भरतादिभिः आचार्यैः प्रतिपादिताः गुणसम्बद्धाः सिद्धान्ताः काव्यस्य सौन्दर्याधायकतथ्यानि प्रकटयन्ति। तस्मात् साहित्यशास्त्रस्याध्ययनं न केवलं प्राचीनज्ञानोपार्जनाय, अपितु नूतनसाहित्यप्रक्रियाणां सर्जनायापि अत्यावश्यकमस्ति इति निष्कर्षः।

**सन्दर्भग्रन्थसूची**


1. भरतमुनिः। नाट्यशास्त्रम् (Nāṭyaśāstra)। वडोदरा: ओरिएंटल इंस्टिट्यूट; 1992।
2. भामहः। काव्यालङ्कारः (Kāvyālaṅkāraḥ)। वाराणसी: चौखंबा सुरभारती प्रकाशन; 2010।
3. दण्डी। काव्यादर्शः (Kāvyādarśaḥ)। पुणे: आनंदाश्रम मुद्रणालय; 1938।
4. वामनः। काव्यालङ्कारसूत्रवृत्तिः (Kāvyālaṅkārasūtravṛttiḥ)। दिल्ली: मोतीलाल बनारसीदास; 1971।
5. आनन्दवर्धनः। ध्वन्यालोकः (Dhvanyālokaḥ)। वाराणसी: चौखंबा विद्याभवन; 2012।
6. मम्मटः। काव्यप्रकाशः (Kāvyaprakāśaḥ)। वाराणसी: चौखंबा सुरभारती प्रकाशन; 2008।
7. विश्वनाथः। साहित्यदर्पणः (Sāhityadarpaṇaḥ)। दिल्ली: मोतीलाल बनारसीदास; 2009।
8. जगन्नाथः। रसगङ्गाधरः (Rasagaṅgādharaḥ)। वाराणसी: चौखंबा विद्याभवन; 1964।
9. विद्यानाथः। प्रतापरुद्रयशोभूषणम् (Pratāparudrayaśobhūṣaṇam)। चेन्नई: संस्कृत एजुकेशन सोसाइटी; 1979।
10. कुन्तकः। वक्रोक्तिजीवितम् (Vakroktijīvitam)। दिल्ली: मोतीलाल बनारसीदास; 1977।


[15] काव्यप्रकाशः ८-६६
[16] काव्यप्रकाशः ८-६८
[17] काव्यप्रकाशः ८-७२
[18] काव्यप्रकाशः ८-६८,६९
[19] काव्यप्रकाशः ८-६९,७०
[20] काव्यप्रकाशः ८-७०,७१